यथा- अभिमानी मानं न लभते। **(**अभिमानी / अभिमानिन:**)**

(i) ____________ सदा सम्मान्याः भवन्ति। (विज्ञानी / विज्ञानिन:)

(ii) ____________ शान्तिम् न प्राप्नोति। (लोभिनः / लोभी)

(iii) ____________ धन्याः लोके। (दानी / दानिनः)

(iv) ____________ विवेकः नश्यति। (क्रोधी / क्रोधिन:)

(v) किं कुलेन विशालेन विद्याहीनस्य ____________ (देही / देहिनः)

(vi) ____________ जनः सर्वप्रियः भवति। (विनोदिनः / विनोदी)

(vii) सर्वे भवन्तु ____________ (सुखी / सुखिनः)

(viii) ____________ इयम् बाला। (व्यवसायी / व्यवसायिनी)

उत्तराणि:

(i) विज्ञानिनः

(ii) लोभी

(iii) दानिनः

(iv) क्रोधिनः

(v) देहिनः

(vi) विनोदी

(vii) सुखिनः

(viii) व्यवसायिनी

**12.** अधोलिखितेषु वाक्येषु स्थूलाक्षरपदेषु प्रकृति-प्रत्ययविभागं कुरुत-

यथा– बुद्धिमान् सर्वत्र पूज्यते।

| | प्रकृतिः | + | प्रत्यय |
|---|---|---|---|
| | बुद्धि | + | मतुप् |
| (i) बलवती हि आशा | ................... | + | ................... |
| (ii) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः | ................... | + | ................... |
| (iii) गुणिनां गुणाः पूजास्थानं भवन्ति | ................... | + | ................... |
| (iv) नैतिकी शिक्षा आवश्यकी | ................... | + | ................... |
| (v) नीतिमान् जनः सुष्ठु आचरति | ................... | + | ................... |
| (vi) उदारता श्रेष्ठः गुणः | ................... | + | ................... |
| (vii) विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन | ................... | + | ................... |

NCERT Solutions for Class 10 Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-प्रत्ययाः

उत्तराणि:

(i) बल + मतुप् + ङीप्

(ii) उद्योग + इन्

(iii) गुण + इन्

(iv) नीति + ठक् + ङीप्

(v) नीति + मतुप्

(vi) उदार + तल्

(vii) विद्वस् + त्व, नृप + त्व

**13.** अधोलिखितानां विशेष्याणां विशेषणपदानि कोष्ठकात् चित्वा लिखत-

**विशेषणपदानि विशेष्यपदानि**

| | | | |
|---|---|---|---|
| **यथा–ऐतिहासिकम् नाटकम्** | | **(ऐतिहासिकः / ऐतिहासिकम्)** | |
| (i) | ...................................... | उपदेशः | (नैतिकः / नैतिकम्) |
| (ii) | ...................................... | अभ्यासः | (प्रायोगिकम् / प्रायोगिकः) |
| (iii) | ...................................... | परीक्षा | (मासिकम् / मासिकी) |
| (iv) | ...................................... | निमन्त्रणम् | (औपचारिकम् / औपचारिकः) |
| (v) | ...................................... | कृतिः | (मौलिकम् / मौलिकी) |
| (vi) | ...................................... | दृश्यम् | (प्राकृतिकम् / प्राकृतिकः) |
| (vii) | ...................................... | विद्यालयः | (प्राथमिकम् / प्राथमिकः) |
| (viii) | ...................................... | विद्या | (आध्यात्मिकी / आध्यात्मिकम्) |

NCERT Solutions for Class 10 Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-प्रत्ययाः

**उत्तराणि:**

(i) नैतिकः

(ii) प्रायोगिकः

(iii) मासिकी

(iv) औपचारिकम्

(v) मौलिकी

(vi) प्राकृतिकम्

(vii) प्राथमिकः

(viii) आध्यात्मिकी

**14.** अधोलिखित-शब्दैः सह 'त्व'-प्रत्ययम् योजयत-

यथा- पृथु + त्व = पृथुत्वम्

(i) लघु + त्व = ____________

(ii) मनुष्य + त्व = ____________

(iii) विशाल + त्व = ____________

(iv) कवि + त्व = ____________

(v) दीन + त्व = ____________

(vi) क्षत्रिय + त्व = ____________

(vii) वीर + त्व = ____________

(viii) शम + त्व = ____________

उत्तराणि:

(i) लघुत्वम्

(ii) मनुष्यत्वम्

(iii) विशालत्वम्

(iv) कवित्वम्

(v) दीनत्वम्

(vi) क्षत्रियत्वम्

(vii) वीरत्वम्

(viii) शमत्वम्।

**15.** अधः मञ्जूषायां प्रदत्तैः शब्दैः सह 'तल्' प्रत्ययं संयोज्य यथोचितं रिक्तस्थानानि पूरयत।

यथा- क्रूरता तु सदैव निन्दनीया एव भवति।

क्रूर, चञ्चल, दक्ष, स्वच्छ, उष्ण, निर्धन, रमणीय

(i) अपने ____________ शीतकाले रोचते।

(ii) ____________ दु:खदायिनी भवति।

(iii) गृहस्य ____________ आनन्ददायिनी भवति।

(iv) प्रकृतेः ____________ मनोरमा अस्ति।

(v) मनसः ____________ वानरस्य इव भवति।

(vi) गणितविषये अशोकस्य ____________ प्रशंसनीया वर्तते।

उत्तराणि:

(i) उष्णता

(ii) निर्धनता

(iii) स्वच्छता

(iv) रमणीयता

(v) चञ्चलता

(vi) दक्षता

**16.** 'त्व' – 'तल्' – प्रत्ययान्तानि पदानि मञ्जूषायाः चित्वा यथोचितम् रिक्तस्थानानि पूरयत-

यथा- पवनस्य शीतलताम् अनुभूय मनः प्रसीदति।

चञ्चलत्वम्, मित्रता, वीरता, महत्त्वम्, पशुत्वम्

(i) विद्यायाः ____________ को न जानाति?

(ii) कृष्णसुदाम्नोः ____________ जगति आदर्शं स्थापयति।

(iii) दुष्प्रयुक्ता वाणी मनुष्यस्य ____________ प्रकटयति।

(iv) मनसः ____________ वशीकरणीयम्।

(v) लवस्य ____________ अद्भुता आसीत्।

उत्तराणि:

(i) महत्त्वम्

(ii) मित्रता

(iii) पशुत्वम्

(iv) चञ्चलत्वम्

(v) वीरता

**17.** अधोलिखिताः सूक्तीः पठित्वा 'तल्-त्व-प्रत्ययान्तानि पदानि रेखाङ्कितानि कुरुत-

यथा-

(i) ऐश्वर्यस्य विभूषणम् सुजनता।

(ii) न कालस्य अस्ति बन्धुत्वम्।

(iii) अविवेकिता तु अनर्थाय एव भवति।

(iv) अहो! बालकस्य ईदृशी निपुणता।

(v) न अस्ति अमरत्वम् हि कस्यचित् प्राणिनः भुवि।

(vi) क्षणे क्षणे यत् नवताम् उपैति तदेव रूपं रमणीयतायाः।

(vii) विद्वत्वम् च नृपत्वम् च नैव तुल्यम् कदाचन।

उत्तराणि:

(iii) अविवेकता

(iv) निपुणता

(v) अमरत्वम्

(vi) नवताम्, रमणीयतायाः

(vii) विद्वत्वम्, नृपत्वम्।

**18.** अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां मूलशब्दं प्रत्ययं च पृथक् कृत्य लिखत-

| | | मूलशब्दः | + | प्रत्ययः |
|---|---|---|---|---|
| यथा– | आगता पर्वसु **प्रिया** दीपावलिः। | प्रिय | + | टाप् |
| (*i*) | विपणीनां शोभा **अनुपमा** भविष्यति। | ................. | + | ................. |
| (*ii*) | रात्रिः दीपानां प्रकाशेन **उज्ज्वला** भविष्यति। | ................. | + | ................. |

NCERT Solutions for Class 10 Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम)-प्रत्ययाः

| | | | | |
|---|---|---|---|---|
| (*iii*) | पूजनेन **प्रसन्ना** लक्ष्मीः कृपां करिष्यति। | ................. | + | ................. |
| (*iv*) | 'भवतु **शुभदा** दीपावलिः' इति परस्परम् कामयन्ते जनाः। | ................. | + | ................. |
| (*v*) | **धन्या** इयं दीपावलिः प्रकाशपुञ्जा। | ................. | + | ................. |

NCERT Solutions for Class 10 Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम)-प्रत्ययाः

उत्तराणि:

(i) अनुपम + टाप्

(ii) उज्ज्वल + टाप्

(ii) प्रसन्न + टाप्

(iv) शुभद + टाप्

(v) धन्य + टाप्

**19.** अधोलिखितेषु वाक्येषु निर्दिष्टशब्दैः सह 'ङीप्' प्रत्ययं प्रयुज्य वाक्यानि पूरयत-

यथा- श्रीमती **(**श्रीमत् **+** ङीप्**)** हेमा नाट्योत्सवे दीप प्रज्वालयति।

(i) (कुमार + ङीप्) ____________ वन्दना पुष्पगुच्छैः तस्याः स्वागतं करोति।

(ii) एका (किशोर + ङीप्) ____________ भरतनाट्यम् प्रस्तौति।

(iii) तया सह (नृत्यत् + ङीप्) ____________ देविका अस्ति।

(iv) मञ्चे (गायत् + ङीप्) ____________ सधा अस्ति।

(v) (मनोहारिन् + ङीप्) ____________ एषा नाट्यप्रस्तुतिः।

उत्तराणि:

(i) कुमारी

(ii) किशोरी

(iii) नृत्यन्ती

(iv) गायन्ती

(v) मनोहारिणी

**20.** अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां मूलशब्दं स्त्रीप्रत्ययं च पृथक्कृत्य लिखत-

| | | मूलशब्दः | + | स्त्रीप्रत्ययः |
|---|---|---|---|---|
| यथा– | **हसन्ती** विभा स्वसखीम् अमिलत्। | हसत् | + | ङीप् |
| (i) | तदैव एका **तरुणी** विभाम् अपृच्छत्। | ................ | + | ................ |
| (ii) | किम् इयम् तव सखी **कुमारी** भावना अस्ति? | ................ | + | ................ |
| (iii) | अहो! **एतादृशीं** सखीं प्राप्य त्वं धन्या असि। | ................ | + | ................ |
| (iv) | तया बसयानात् **पतन्ती** बाला रक्षिता। | ................ | + | ................ |

NCERT Solutions for Class 10 Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-प्रत्ययाः

उत्तराणि:

(i) तरुण + ङीप्

(ii) कुमार + ङीप्

(iii) एतादृश + ङीप्

(vi) पतत् + ङीप्

**21.** स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा उत्तरपुस्तिकायाम् लिखत।

**(स्थूल पदों के प्रकृति-प्रत्यय अलग अथवा संयुक्त करके उत्तर पुस्तिका में लिखिए। Separate or join suffixes in the bold words and write answer in the answer sheet.)**

(i) कोकिल **+** टाप् च आम्रवृक्षे मधुरस्वरेण गायन्ति।

(ii) जगति विश्वबन्धु **+** तल् भवेत्।

(iii) दीनजनान् सेव् **+** शानच् जनाः पुण्यं लभन्ते।

(iv) गङ्गा पवित्र **+** टाप् अतः प्रदूषिता न कर्तव्या।

(v) ये छात्राः सर्वं वर्ष परिश्रमं कुर्वन्ति तेभ्यं वर्ष **+** ठक् **+** डीप परीक्षा भयं न जनयति।

(vi) त्वम् कर्तव्यनिष्ठ अधिकार **+** इन् असि।

(vii) सर्वैः सहपाठिभिः सह मित्र **+** तल आचरणीया।

(viii) छात्रजीवने परिश्रमस्य महत् **+** त्व वर्तते।

(ix) परं निरन्तरं वृध् **+** शानच् प्रदूषणेन मानवजातिः विविधैः रोगैः आक्रान्ता अस्ति।

(x) कष्टानि सह् **+** शानच् वीराः कीर्तिं लभन्ते।

(xi) गुरोः गुरु **+** त्व वर्णयितुं न शक्यते।

(xii) प्रकृतेः रमणीय **+** तल् दर्शनीया अस्ति।

(xiii) शिष्य **+** टाप् जलेन लताः सिञ्चति।

(xiv) संसारे प्र **+** यत् + शानच् जनः साफल्यम् आप्नोति।

(xv) लौकिक + ङीप उन्नतिः यश: वर्धयति।

उत्तराणि:

(i) कोकिला:

(ii) विश्वबन्धुता

(iii) सेवमानाः

(iv) पवित्रा

(v) वार्षिकी

(vi) अधिकारी

(vii) मित्रता

(viii) महत्त्वं

(ix) वर्धमानेन

(x) सहमानाः

(xi) गुरुत्वं

(xii) रमणीयता

(xiii) शिष्या

(xiv) प्रयतमानः

(xv) लौकिकी

## बहुविकल्पीय प्रश्नाः (NCERT Class 10 Sanskrit Grammar खण्ड 'ग')

**1.** प्रदत्तेषु उत्तरेषु प्रत्ययानुसारम् विकल्पेषु यत् उत्तरम् शुद्धम् अस्ति तत् चीयताम्।

(दिए गए उत्तरों में से प्रत्यय के अनुसार विकल्पों में से जो उत्तर शुद्ध है, उसे चुनिए।
**Choose the answer that you consider the most appropriate from the options given below to complete the sentence.)**

प्रश्न **1.**

कृषकैः पशवः स्नेहेन ____________ (रक्षितव्याः)।

(क) रक्ष् + तव्यत्

(ख) रक्ष् + तव्य

(ग) रक्ष् + तव्यः

(घ) रक्षि + तव्यत्।

उत्तराणि:

(क) रक्ष् + तव्यत्

प्रश्न **2.**

पितरः सदैव ____________ (वन्द **+** अनीयर)।

(क) वन्दनीयः

(ख) वन्दनीयाः

(ग) वन्दनीया

(घ) वन्दनीयम्।

उत्तराणि:

(ख) वन्दनीयाः

प्रश्न **3.**

____________ (छाया **+** मतुप्) वृक्षाः मार्गे श्रान्तपथिकेभ्यः आश्रयं यच्छन्ति।

(क) छायावान्

(ख) छायावन्तः

(ग) छायावन्तम्

(घ) छायावतः।

उत्तराणि:

(ख) छायावन्तः

प्रश्न 4.

यथा ____________ (फल + इन्) वृक्षाः नमन्ति तथैव गुणिनः जनाः अपि नमेयुः।

(क) फली

(ख) फलिनौ

(ग) फलिनः

(घ) फलिनाः।

उत्तराणि:

(ग) फलिनः

प्रश्न 5.

अस्माभिः परस्परं स्नेहेन (वस् + तव्यत्) ____________।

(क) वसितव्यः

(ख) वसितव्या

(ग) वसितव्यम्

(घ) उषितव्यम्।

उत्तराणि:

(घ) उषितव्यम्।

प्रश्न 6.

विद्यार्थिभिः यथासमयं विद्यालयः ____________ ( गम् + तव्यत्)।

(क) गन्तव्यम्

(ख) गन्तव्यः

(ग) गन्तव्या

(घ) गन्तव्याः

उत्तराणि:

(ख) गन्तव्यः

प्रश्न 7.

जानासि, अस्माकं विद्यार्थिनां कानि (कृ + तव्यत्) ____________?

(क) कर्तव्यम्

(ख) कर्तव्यौ

(ग) कर्तव्यानि

(घ) कर्तव्याः

उत्तराणि:

(ग) कर्तव्यानि

प्रश्न 8.

अस्माभिः विद्यालयस्य अनुशासनं (पाल् + अनीयर्) ____________

(क) पालनीयम्

(ख) पालनीयः

(ग) पालनीया

(घ) पालनीयन्ति।

उत्तराणि:

(क) पालनीयम्

प्रश्न **9.**

सत्यम् एव उक्तम्, ____________ **(**सुखार्थ **+** इन्**)** कुतः विद्या?

(क) सुखार्थी

(ख) सुखार्थीम्

(ग) सुखार्थिन:

(घ) सुखार्थिने।

उत्तराणि:

(घ) सुखार्थिने।

प्रश्न **10.**

जनैः सौन्दर्यमयी सृष्टि: दूषिता न **(**कृ **+** तव्यत्**)** ____________

(क) कर्तव्यः

(ख) कर्तव्यम्

(ग) कर्तव्या

(घ) कर्तव्याः

**उत्तराणि:**

(ग) कर्तव्या

**प्रश्न 11.**

पुस्तकेषु किमपि न (लिख + अनीयर) ___________।

(क) लेखनीयः

(ख) लेखनीयम्

(ग) लेखनीया

(घ) लेखनीयाः।

उत्तराणि:

(ख) लेखनीयम्

**प्रश्न 12.**

मनुष्यः **(समाज + ठक्)** ___________ प्राणी अस्ति।

(क) सामाजिकः

(ख) सामाजिकी

(ग) सामाजिकम्

(घ) सामाजिकाः।

**उत्तराणि:**

(क) सामाजिकः

**प्रश्न 13.**

**(बुद्धि + मतुप्)** ___________ नरः सर्वत्र मानं लभते।

(क) बुद्धिमत्

(ख) बुद्धिमान्

(ग) बुद्धिमन्तः

(घ) बुद्धिमतः।

**उत्तराणि:**

(ख) बुद्धिमान्

**प्रश्न 14.**

**नमन्ति (फल + इन्) ____________** वृक्षाः।

(क) फलिनः

(ब) फली

(ग) फलिनौ

(घ) फलिनाः।

**उत्तराणि:**

(क) फलिनः

**प्रश्न 15.**

**(बल + मतुप)** ____________ हि आशा।

(क) बलवान्

(ख) बलवत्

(ग) बलवती

(घ) बलवतः।

**उत्तराणि:**

(ग) बलवती

**प्रश्न 16.**

**(दान + इन्)** ____________ मानं त्यजेत्।

(क) दानिन्

(ख) दानी

(ग) दानिनः

(घ) दनिनीम्।

**उत्तराणि:**

(ख) दानी

**प्रश्न 17.**

**(सप्ताह + ठक्)** ____________ अवकाशः रविवारे भवति।

(क) साप्ताहिक:

(ख) साप्ताहिकी

(ग) साप्ताहिकम्

(घ) साप्ताहिकाः।

**उत्तराणि:**

(क) साप्ताहिक:

**2.** स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा विकल्पेभ्यः शुद्धं उत्तरं चित्त्वा उत्तरपुस्तिकायाम् लिखत।

**(स्थूल पदों के प्रकृति-प्रत्यय अलग अथवा संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join suffixes in the bold words and write answer appropriate from the options given below in the answer sheet.)**

प्रश्न **1.**

राजसभायाम् मन्त्र **+** इन् भाषयन्ति।

(क) मन्त्रिन्

(ख) मन्त्रिण:

(ग) मन्त्री

(घ) मन्त्रि।

उत्तराणि**:**

(ख) मन्त्रिण:

प्रश्न **2.**

तया भोजनं पच् **+** तव्यत्।

(क) पचितव्यम्

(ख) पक्तव्यम्

(ग) पचतव्यम्

(घ) पन्तव्यम्।

उत्तराणि**:**

(ख) पक्तव्यम्

प्रश्न **3.**

नागरिकाः देशम् रक्षन्ति।

(क) नगर + ठक्

(ख) नागर + इक

(ग) नगर + इक्

(घ) नागरि + इक।

उत्तराणि:

(क) नगर + ठक्

प्रश्न **4.**

पठनेन नरः गुणवान् भवति।

(क) गुण + वतुप्

(ख) गुण + मत्

(ग) गुण + मतुप्

(घ) गुण + वत्।

उत्तराणि:

(ग) गुण + मतुप्

प्रश्न **5.**

ते जनाः वन्दनीयाः भवन्ति।

(क) वद् + अनीयर्

(ख) वन्द् + अनीयर्

(ग) वन्द् + अनीयः

(घ) वन्द + अनीयस्।

उत्तराणि:

(ख) वन्द् + अनीयर्

प्रश्न 6.

कार्यं तु सदैव ध्यानेन एव करणीयम्।

(क) कृ + अनीयर्

(ख) कृ + अणीयर्

(ग) कर् + अनीयर्

(घ) कर् + अणीयम्।

उत्तराणि:

(क) कृ + अनीयर्

प्रश्न 7.

कार्यं सदैव शीघ्रं परन्तु धैर्येण कर्तव्यम्।

(क) कर्त + व्यत्

(ख) कर्तृ + तव्यम

(ग) कृ + तव्यत्

(घ) कृ + त्वयत्।

उत्तराणि:

(ग) कृ + तव्यत्

प्रश्न 8.

पुस्तकानाम् अध्ययनम् करणीयम्।

(क) कर् + अनीयम्

(ख) कृ + अनीयम

(ग) कृ + अनीयर्

(घ) कृ + अनीयत्।

उत्तराणि:

(ग) कृ + अनीयर्

प्रश्न **9.**

अस्माभिः सेवकाः पोषणीयाः।

(क) पोष् + अनीयाः

(ख) पोष् + अनीयत्

(ग) पुष् + अनीयर्

(घ) पोष् + अनीयर।

उत्तराणि:

(घ) पोष् + अनीयर।

प्रश्न **10.**

बालकैः गुरवः नन्तव्याः।

(क) नम् + तव्यत्

(ख) नम् + तव्याः

(ग) नन् + तव्यत्

(घ) नन् + तव्याः

**उत्तराणि:**

(क) नम् + तव्यत्

**प्रश्न 11.**

बालिकाभिः राष्ट्रगीतं ____________ **(गै + तव्यत्)**

(क) गीतव्यम्

(ख) गातव्यम्

(ग) गैतव्यम्

(घ) गेतव्यम्।

**उत्तराणि:**

(ख) गातव्यम्

**प्रश्न 12.**

त्वया शुद्धं जलं पातव्यम्।

(क) पा + तव्यत्

(ख) पा + तव्यम्

(ग) पा + तव्य

(घ) पा + तव्याः

**उत्तराणि:**

(क) पा + तव्यत्

**प्रश्न 13.**

मुनिभिः तप: करणीयम्।

(क) कृ + अनीयम्

(ख) कृ + अनीयत्

(ग) कृ + अनीय

(घ) कृ + अनीयर।

उत्तराणि:

(घ) कृ + अनीयर।

**प्रश्न 14.**

न्यायाधीशेन न्यायः ____________ **(कृ + अनीयर्)**।

(क) करणीय

(ख) करणीयर्

(ग) करणीयः

(घ) करणीया।

उत्तराणि:

(ग) करणीयः

**प्रश्न 15.**

भवत्या पाठः लेखनीयः।

(क) लिख् + अनीय

(ख) लिख् + अनीयर्

(ग) लेख् + अनीयर्

(घ) लेख + अनीयम्।

**उत्तराणि:**

(ख) लिख् + अनीयर्

**प्रश्न 16.**

अस्माभिः लता आरोपयितव्याः।

(क) आरोप् + तव्यः

(ख) आरुप् + तव्याः

(ग) आ + रोप् + तव्यत्

(घ) आरोप + तव्याः

**उत्तराणि:**

(ग) आ + रोप् + तव्यत्

**प्रश्न 17.**

पत्रवाहकेन पत्राणि ____________ **(आ + नी + तव्यत्)**।

(क) आनीतव्यानि

(ख) आनेतव्यानि

(ग) आनेतव्यम्

(घ) आनेतव्यः।

**उत्तराणि:**

(ख) आनेतव्यानि

प्रश्न 18.

राज्ञा प्रजाः पालनीयाः।

(क) पाल् + अनीयर्

(ख) पाल् + अनीयाः

(ग) पाल् + अनीयम्

(घ) पालय् + अनीयत्।

उत्तराणि:

(क) पाल् + अनीयर्

प्रश्न **19.**

छात्रैः समये विद्यालयः **(**गम् **+** तव्यत्**)** ____________।

(क) गम्तव्यः

(ख) गन्तव्यः

(ग) गन्तव्या

(घ) गन्तव्याः।

उत्तराणि:

(ख) गन्तव्यः

प्रश्न **20.**

**(**बुद्धि **+** मतुप**)** ____________ नरः सर्वत्र मानं लभते।

(क) बुद्धिमतः

(ख) बुद्धिमन्तः

(ग) बुद्धिमन्

(घ) बुद्धिमान्।

उत्तराणि:

(घ) बुद्धिमान्।

**प्रश्न 21.**

नृपेण प्रजाः **(पाल् + अनीयर्)** ____________।

(क) पालनीया

(ख) पालनीयम्

(ग) पालनीयः

(घ) पालनीयाः।

उत्तराणि:

(घ) पालनीयाः।

**प्रश्न 22.**

मनुष्यः **(समाज + ठक्)** ____________ प्राणी अस्ति।

(क) सामाजिकी

(ख) समाजिकी

(ग) समाजिकः

(घ) सामाजिकः।

उत्तराणि:

(घ) सामाजिकः।

**प्रश्न 23.**

तेन तत्र न ____________ (स्था + तव्यत्)।

(क) स्थातव्यः

(ख) स्थातव्यम्

(ग) स्थातव्या

(घ) स्थातव्याः।

**उत्तराणि:**

(ख) स्थातव्यम्

**प्रश्न 24.**

एकदा राजा तं ____________ (बुद्धि + मतुप्) द्रष्टुं-

(क) बुद्धिमान्

(ख) बुद्धिमानं

(ग) बुद्धिमन्तं

(घ) बुद्धिमत।

**उत्तराणि:**

(ग) बुद्धिमन्तं

**प्रश्न 25.**

तस्य कुटीरम् ____________ (गम् + तव्यत्) इति निश्चितवान्।

(क) गन्तव्यम्

(ख) गन्तव्यः

(ग) गन्तव्याः

(घ) गन्तव्यत्।

उत्तराणि:

(क) गन्तव्यम्

**प्रश्न 26.**

तत्र गत्वा तस्य ____________ **(दरिद्र + तल्)** दूरीकर्तुं सः तस्मै स्वर्णमुद्राः अयच्छत्।

(क) दरिद्रताः

(ख) दरिद्रता

(ग) दरिद्रतम्

(घ) दरिद्रताम्।

उत्तराणि:

(घ) दरिद्रताम्।

**प्रश्न 27.**

कैयटः अवदत्-धनस्य ____________ **(लोभ + इन्)** जनाः आसक्ताः भूत्वा दु:खिनः भवन्ति। अतः मम आनन्दं मा नाशयतु इति।

(क) लोभिनः

(ख) लोभी

(ग) लोभिन्

(घ) लोभि।

उत्तराणि:

(क) लोभिनः

**प्रश्न 28.**

सर्वे एव ____________ (दुःख + इन्) आसन्।

(क) दुःखीः

(ख) दुखिन्

(ग) दुःखी

(घ) दुःखिनः।

उत्तराणि:

(घ) दुःखिनः।

**प्रश्न 29.**

____________ (कृ + अनीयर्)। एकः अन्यः अवदत्, 'कः करिष्यति?

(क) करनीयम्

(ख) करणीयम्

(ग) करणीयः

(घ) करणीया।

उत्तराणि:

(ख) करणीयम्

**प्रश्न 30.**

वयं वाटिकां प्रति गच्छामः। ऋतुराजः वसन्तः ____________ (दृश् + अनीयर्)

(क) दर्शनीयः

(ख) दृशनीयः

(ग) दृशनीयम्

(घ) दर्शनीयम्।

उत्तराणि:

(क) दर्शनीयः

**प्रश्न 31.**

प्रातःकाले उद्यानस्य शोभा खलु ____________ **(दृश + अनीयर)।**

(क) दृशनीयः

(ख) दर्शनीया

(ग) दृशनीया

(घ) दर्शनीयः।

उत्तराणि:

(ख) दर्शनीया

**प्रश्न 32.**

____________ **(गुण + इन्)** जनाः तेषां सज्जनानाम् आदरं कुर्वन्ति।

(क) गुणि

(ख) गुणिनः

(ग) गुणिनौ

(घ) गुणीः।

उत्तराणि:

(ख) गुणिनः

**3.** कोष्ठकेषु प्रदत्तान् प्रकृतिप्रत्ययान् योजयित्वा रिक्तस्थान पूर्तिः करणीया।

**(कोष्ठक में दिए गए प्रकृति-प्रत्ययों को जोड़कर रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks by adding suffixes given in the brackets.)**

प्रश्न **1.**

अध्यापक:- ____________ (बुद्धि **+** मतुप्) छात्राः! संसारेऽस्मिन् कः श्रेष्ठः?

(क) बुद्धिमन्तः

(ख) बुद्धिमानाः

(ग) बुद्धिवन्तः

(घ) बुद्धिमान्।

उत्तराणि**:**

(क) बुद्धिमन्तः

प्रश्न **2.**

यः ____________ (रूप **+** मतुप्) नरः भवति जनाः तम् एव श्रेष्ठ मन्यन्ते।

(क) रूपवान्

(ख) रूपमान्

(ग) रूपवानः

(घ) धनमानः।

उत्तराणि**:**

(क) रूपवान्

प्रश्न **3.**

____________ (सदाचार **+** मतुप्), विवेकी-

(क) सदाचारमान्

(ख) सदाचारवान्

(ग) सदाचारवन्तः

(घ) सदाचारमन्तः।

उत्तराणि:

(ख) सदाचारवान्

प्रश्न **4.**

____________ **(नीति + मतुप्)**

(क) नीतिवान्

(ख) नीतीमान्

(ग) नीतिमान्

(घ) नीतीवान्।

उत्तराणि:

(ग) नीतिमान्

प्रश्न **5.**

____________ **(चरित्र + मतुप्)** च जनः एव सर्वोत्तमः भवति।

(क) चरित्रवान्

(ख) चरित्रवान

(ग) चरित्रमान

(घ) चरित्रमानः।

उत्तराणि:

(क) चरित्रवान्

**प्रश्न 6.**

यः सत्यवादी ____________ **(निष्ठा + मतुप्)**

(क) निष्ठावन्तः

(ख) निष्ठावतः

(ग) निष्ठावान्

(घ) निष्ठावान।

उत्तराणि:

(ग) निष्ठावान्

**प्रश्न 7.**

____________ **(विनय + मतुप्)**

(क) विनयी

(ख) विनयवान्

(ग) विनयमान्

(घ) विनयवान।

उत्तराणि:

(ख) विनयवान्

**प्रश्न 8.**

____________ **(गुण + मतुप्)** श्रेष्ठः च मन्यते।

(क) गुणवान्

(ख) गुणमान्

(ग) गुणवान

(घ) गुणमान।

उत्तराणि:

(क) गुणवान्

प्रश्न **9.**

वीराः अभ्युदये ___________ **(**धैर्य **+** मतुप**)** भवन्ति।

(क) धैर्यवन्तः

(ख) धैर्यवानाः

(ग) धैर्यवताः

(घ) धैर्यमन्तः।

उत्तराणि**:**

(क) धैर्यवन्तः

**4.** स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा विकल्पेभ्यः शुद्धं उत्तरं चित्त्वा उत्तरपुस्तिकायाम् लिखत।

**(**स्थूल पदों के प्रकृति-प्रत्यय अलग अथवा संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर**-**पुस्तिका में लिखिए। **Separate or join suffixes in the bold words and write answer appropriate from the options given below in the answer sheet.)**

प्रश्न **1.**

पुत्र! तव कृशता मां तुदति।

(क) कृश + तल्

(ख) कृश + ता

(ग) कृश + शत् + आ

(घ) कृ + शता।

उत्तराणि:

(क) कृश + तल्

प्रश्न 2.

विद्यालये बालकाः मोदमानाः पठन्ति।

(क) मोद् + शानच्

(ख) मुद् + शानच्

(ग) मुद् + मानाः

(घ) मुद् + मतुप्।

उत्तराणि:

(ख) मुद् + शानच्

प्रश्न 3.

छात्रैः कथा लेखितव्या।

(क) लिख् + तव्या

(ख) लिख् + तव्यत्

(ग) लिख् + तव्यत् + टाप्

(घ) लेख् + तव्यत्।

उत्तराणि:

(ग) लिख् + तव्यत् + टाप्

प्रश्न **4.**

वीरः युद्धयमानः वीरगतिं आप्नोत्।

(क) युद्ध + मानम्

(ख) युध् + मानत्

(ग) युध् + शानच्

(घ) युद्ध + शानच्।

उत्तराणि:

(ग) युध् + शानच्

प्रश्न **5.**

देवम् वन्दमानाः ललनाः प्रसीदन्ति।

(क) वन्द + शानच्

(ख) वन्द् + शानच्

(ग) वन्द् + शानच् + टाप्

(घ) वन्द + मानाः।

उत्तराणि:

(ग) वन्द् + शानच् + टाप्

प्रश्न **6.**

तत्र जायमानः बालकः कीदृशो भविष्यति?

(क) जा + शानच्

(ख) जन् + शानच्

(ग) ज्ञा + शानच्

(घ) ज्ञान + शानच्।

उत्तराणि:

(ख) जन् + शानच्

प्रश्न 7.

सीता रामेण सह वनं गच्छन्ती आसीत्।

(क) गम् + शतृ + ङीप्

(ख) गम् + ङीप्

(ग) गम् + शतृ

(घ) गम् + शानच् + ङीप्।

उत्तराणि:

(क) गम् + शतृ + ङीप्

प्रश्न 8.

गङ्गा नदी हिमालयात् उद्भवति।

(क) नद् + ङीप्

(ख) नद + इन्

(ग) नद + ङीप्

(घ) नद् + इन।

उत्तराणि:

(ग) नद + ङीप्

**प्रश्न 9.**

रूपवती भार्या कस्मै न रोचते?

(क) रूपवत + मतुप्

(ख) रूपवत + ङीप्

(ग) रूपवत् + इन्

(घ) रूप + मतुप् + ङीप्।

**उत्तराणि:**

(घ) रूप + मतुप् + ङीप्।

**प्रश्न 10.**

जीवने विद्यायाः अपि महत्त्वं वर्तते।

(क) महत् + त्वं

(ख) महत् + त्व

(ग) महत्त्व + मतुप्

(घ) महत्त + त्व।

**उत्तराणि:**

(ख) महत् + त्व

**प्रश्न 11.**

ये जनाः अस्य अस्थिरताम् अनुभूय स्वकार्याणि यथासमयं कुर्वन्ति ते एव बुद्धिमन्तः भवन्ति।

(क) अस्थिर + ता

(ख) अस्थिर + तल्

(ग) अस्थिर + टाप्

(घ) अस्थिरता + आ।

उत्तराणि:

(ख) अस्थिर + तल्

प्रश्न 12.

जनाः तीव्र धावन्तः गच्छन्ति।

(क) धाव + अन्तः

(ख) धा + वन्तः

(ग) धाव् + शतृ

(घ) धाव् + शानच्।

उत्तराणि:

(ग) धाव् + शतृ

प्रश्न 13.

गृहं गच्छन्त्यः छात्राः प्रसीदन्ति।

(क) गम् + शतृ

(ख) गम् + शतृ + ङीप्

(ग) गम् + ङीप्

(घ) गम् + शत् + टाप्।

उत्तराणि:

(ख) गम् + शतृ + ङीप्

**प्रश्न 14.**

कालः सदैव गम्यमानः वर्तते।

(क) गम् + शानच्

(ख) गम् + शतृ

(ग) गम् + मतुप्

(घ) गम् + ठक्।

**उत्तराणि:**

(क) गम् + शानच्

**प्रश्न 15.**

किं त्वं जानासि कालस्य महत्त्वम्?

(क) महत् + तव

(ख) महत् + तवं

(ग) महत् + त्वं

(घ) महत् + त्व।

**उत्तराणि:**

(घ) महत् + त्व।

**प्रश्न 16.**

आगता पर्वसु प्रिया दीपावलिः।

(क) प्रिय + आ

(ख) प्रिय + आप

(ग) प्रिय + टाप्

(घ) प्रिय + डाप्।

उत्तराणि:

(ग) प्रिय + टाप्

प्रश्न **17.**

विपणीनां शोभा अनुपमा भविष्यति।

(क) अनुपम + टाप्

(ख) अनुपम + आप्

(ग) अनुपम + चाप्

(घ) अनुपम + ठक्

उत्तराणि:

(क) अनुपम + टाप्

प्रश्न **18.**

धन्या इयं दीपावलिः प्रकाशपुञ्जा।

(क) धन्य् + टाप्

(ख) धन्य + टाप्

(ग) धन्या + टाप्

(घ) धन्या + आ।

उत्तराणि:

(ख) धन्य + टाप्

**प्रश्न 19.**

मधुरा वाणी प्रीणयति मनः।

(क) मधुर + टाप्

(ख) मधुर + आप्

(ग) मधुर + आ

(घ) मधुर + चाप।

उत्तराणि:

(क) मधुर + टाप्

**प्रश्न 20.**

कुलागना सदा सम्मानस्य अधिकारिणी।

(क) अधिकारी + ई

(ख) अधिकारी + ङीप्

(ग) अधिकार + इन्

(घ) अधिकार + ई।

उत्तराणि:

(ख) अधिकारी + ङीप्

**प्रश्न 21.**

सताम् बुद्धिः हितकारिणी भवति।

(क) हितकारिन् + ङीप

(ख) हितकर + ङीप्

(ग) हितकारी + ई

(घ) हितकरी + इन्।

उत्तराणि:

(क) हितकारिन् + ङीप

**प्रश्न 22.**

नैतिकी शिक्षा आवश्यकी।

(क) नैतिक + ईङ्

(ख) नैतिक + ङीप्

(ग) नैतिक + इन्

(घ) नीति + इक् + इन्।

उत्तराणि:

(ख) नैतिक + ङीप्

**प्रश्न 23.**

शिक्षायाः महत्त्वं तु अद्वितीयम् एव।

(क) मह + त्वं

(ख) महा + त्वं

(ग) महत् + त्व

(घ) महत् + त्वं

उत्तराणि:

(ग) महत् + त्व

**प्रश्न 24.**

अजा शनैः शनैः चलति।

(क) अजः + टाप्

(ख) अजा + टाप्

(ग) अजः + आप्

(घ) अजः + आ।

**उत्तराणि:**

(क) अजः + टाप्

**प्रश्न 25.**

गुणिनः जनाः सदैव वन्दनीयाः भवन्ति।

(क) गुण + इनः

(ख) गुण + इन्

(ग) गुण + ईन्

(घ) गुणी + इन्।

**उत्तराणि:**

(ख) गुण + इन्

**प्रश्न 26.**

कोकिला मधुरस्वरेण गायति।

(क) कोकिल + आप्

(ख) कोकिला + टाप्

(ग) कोकिला + आ

(घ) कोकिलः + टाप्।

उत्तराणि:

(घ) कोकिलः + टाप्।

प्रश्न **27.**

फलिनः वृक्षाः एव सदैव नमन्ति।

(क) फल + इन्

(ख) फली + इन्

(ग) फल + इनः

(घ) फल + ङीप्।

उत्तराणि:

(क) फल + इन्

प्रश्न **28.**

वर्धमाना बालिका शीघ्रं-शीघ्रं धावति।

(क) वृध् + शानच्

(ख) वृध् + शानच् + टाप्

(ग) वृध् + टाप्

(घ) वृध् + माना।

उत्तराणि:

(ख) वृध् + शानच् + टाप्

**प्रश्न 29.**

नर्तकी शोभनं नृत्यति।

(क) नृत् + अक् + ई

(ख) नर्तक + ङीप्

(ग) नर्तक + ईङ्।

(घ) नृत् + ङीप्।

उत्तराणि:

(ख) नर्तक + ङीप्

**प्रश्न 30.**

पृथिव्याः गुरुत्वं सर्वे जानन्ति।

(क) गुरु + त्व

(ख) गुरु + त्वं

(ग) गुरु + तवं

(घ) गुरु + तव।

उत्तराणि:

(क) गुरु + त्व

**प्रश्न 31.**

अश्वा वरं धारयति।

(क) अश्व + आ

(ख) अश् + वा

(ग) अश्व + टाप्

(घ) अश्व + टा।

उत्तराणि:

(ग) अश्व + टाप्

**प्रश्न 32.**

भाग्यशालिनः जनाः विश्रामं कुर्वन्ति।

(क) भाग्यशाली + इनः

(ख) भाग्यशाली + इन्

(ग) भाग्यशाल + इन्

(घ) भाग्यशाली + ईन्।

उत्तराणि:

(ग) भाग्यशाल + इन्

**प्रश्न 33.**

पुस्तकानां महत्तां कः न जानाति।

(क) महत् + ताम्

(ख) महत् + तल्

(ग) महत् + ताल्

(घ) महत् + ता।

उत्तराणि:

(ख) महत् + तल्

**प्रश्न 34.**

त्वं मां स्व-अज्ञानतां मा दर्शय।

(क) अज्ञान + ता

(ख) अज्ञान + ताम्

(ग) अज्ञान + तल्

(घ) अज्ञानता + तल्।

उत्तराणि:

(ग) अज्ञान + तल्

**प्रश्न 35.**

पक्षिण: वृक्षेषु तिष्ठन्ति।

(क) पक्षि + ङीप्

(ख) पक्ष + इन्

(ग) पक्ष् + ईञ्

(घ) पक्ष् + इणः।

उत्तराणि:

(ख) पक्ष + इन्

**प्रश्न 36.**

कार्यं कुर्वाणाः छात्राः अङ्कान् लभन्ते।

(क) कृ + शानच्

(ख) कृ + शतृ

(ग) कृ + मतुप्

(घ) कृ + टाप्।

उत्तराणि:

(क) कृ + शानच्

**प्रश्न 37.**

सेवमानाः सेवकाः धनं लभन्ते।

(क) सेव् + मानाः

(ख) सेवमान् + टाप्

(ग) सेव् + शानच्

(घ) सेव् + शत।

उत्तराणि:

(ग) सेव् + शानच्

**प्रश्न 38.**

दीपिका क्रीडायाम् ____________ **(कुशल + टाप्)** अस्ति।

(क) कुशलता

(ख) कुशलय

(ग) कुशला

(घ) कुशलताम्।

उत्तराणि:

(ग) कुशला

**प्रश्न 39.**

प्रभा-दीपिकयोः माता ___________ (चिकित्सक + टाप) अस्ति।

(क) चिकित्सका

(ख) चिकित्सकाः

(ग) चिकित्सकः

(घ) चिकित्सिका।

**उत्तराणि:**

(घ) चिकित्सिका।

**प्रश्न 40.**

सा समाजस्य ___________ (सेवक + टाप्) अपि अस्ति।

(क) सेवका

(ख) सेविका

(ग) सेविकः

(घ) सेवकी।

**उत्तराणि:**

(ख) सेविका

**प्रश्न 41.**

सा तु स्वभावेन अतीव ___________ (सरल + टाप) अस्ति।

(क) सरलता

(ख) सरला

(ग) सरलटा

(घ) सरलताप।

उत्तराणि:

(ख) सरला

**प्रश्न 42.**

अद्य अस्माकं **(वर्ष + ठक् + ङीप्)** ____________ परीक्षा आरभते।

(क) वार्षिकी

(ख) वर्षिकी

(ग) वार्षकी

(घ) वर्षकी।

उत्तराणि:

(क) वार्षिकी

**प्रश्न 43.**

जनकं **(सेव् + शानच्)** ____________ पुत्रः प्रसन्नोऽस्ति।

(क) सेववानः

(ख) सेवमानः

(ग) सेव्यमानः

(घ) सेव्यवानः।

उत्तराणि:

(ख) सेवमानः

**प्रश्न 44.**

पुरस्कारं **(**लभ् **+** शानच्**)** ____________ छात्रः प्रसन्नः भवति।

(क) लभमानः

(ख) लभमानं

(ग) लभमानाः

(घ) लभमाना।

**उत्तराणि:**

(क) लभमानः

**प्रश्न 45.**

प्रकृतेः **(**रमणीय **+** तल्**)** ____________ दर्शनीया अस्ति।

(क) रमणीयता

(ख) रमणीयतां

(ग) रमणीया

(घ) रमणीयां।

**उत्तराणि:**

(क) रमणीयता

**प्रश्न 46.**

वानरयूथस्य स्वामी उवाच-जीवितं ____________ **(**वाञ्छ् **+** शतृ**)** नरः कलहयुक्तं गृहं त्यजेत्।

(क) वाञ्छत्

(ख) वाञ्छन्

(ग) वाञ्छनः

(घ) वाञ्छद्।

उत्तराणि:

(ख) वाञ्छन्

**प्रश्न 47.**

ते ____________ **(मित्र + तल्)** न कुर्वन्ति।

(क) मित्रता

(ख) मित्रता

(ग) मित्रतया

(घ) मित्रताल

उत्तराणि:

(क) मित्रता

**प्रश्न 48.**

एक कैयटः नाम विद्वान् आसीत्। सः प्रातः ____________ **(कृ + शतृ)** शास्त्राणाम् अध्ययने रतः भवति स्म।

(क) कुर्वन्

(ख) कुर्वत्

(ग) कुर्वन्तः

(घ) कुर्वद्।

उत्तराणि:

(क) कुर्वन्

प्रश्न 49.

एकस्यां सभायां बहवः मूषकाः चिन्ता ____________ (कृ + शतृ) उपविष्टाः।

(क) कुर्वन्तः

(ख) कुर्वन्

(ग) कुर्वत्

(घ) कुर्वन्ताः।

उत्तराणि:

(क) कुर्वन्तः

प्रश्न 50.

एका वृद्धा ____________ (मूषक + टाप) अवदत्-अस्याः कण्ठे घण्टिकाबन्धनं।

(क) मूषका

(ख) मूषकी

(ग) मूषिका

(घ) मूषिकाम्।

उत्तराणि:

(ग) मूषिका

प्रश्न 51.

पुष्पाणां ____________ (रमणीय + त्व) दृष्ट्वा मनः प्रसन्नं भवति।

(क) रमणीयतां

(ख) रमणीयत्वः

(ग) रमणीयत्वं

(घ) रमणीयत्व।

उत्तराणि:

(ग) रमणीयत्वं

**प्रश्न 52.**

शीघ्रं शीघ्रं ___________ **(चल् + शतृ)** जनाः प्रसन्नाः भवन्ति।

(क) चलन्

(ख) चलन्तम्

(ग) चलतः

(घ) चलन्तः।

उत्तराणि:

(घ) चलन्तः।

**प्रश्न 53.**

ते वायोः ___________ **(शीतल + तल्)** अनुभवन्ति।

(क) शीतलताः

(ख) शीतलतां

(ग) शीतलता

(घ) शीतलतया।

उत्तराणि:

(ख) शीतलतां

**प्रश्न 54.**

बालकाः ____________ (बालक + टाप्) च कन्दुकेन क्रीडन्ति।

(क) बालिका

(ख) बालिकाः

(ग) बालिका

(घ) बलिकया।

**उत्तराणि:**

(ख) बालिकाः

**प्रश्न 55.**

____________ (आचार्य + टाप्) अपि तेभ्यः क्रुध्यति।

(क) आचार्या

(ख) आचार्यया

(ग) आचार्याम्

(घ) आचार्याः।

**उत्तराणि:**

(क) आचार्या

**प्रश्न 56.**

जीवने शिक्षायाः सर्वाधिकं ____________ (महत् + त्व) वर्तते।

(क) महत्त्वः

(ख) महत्त्वो

(ग) महत्त्वं

(घ) महत्तम्।

उत्तराणि:

(ग) महत्त्वं

प्रश्न 57.

परोपकारं ____________ (कृ + शानच्) देशस्य सर्वदा हितम् एव चिन्तयन्ति।

(क) कुर्वाणाः

(ख) कुर्वाणा

(ग) कुर्वाणं

(घ) कुर्वाणः।

उत्तराणि:

(क) कुर्वाणाः

प्रश्न 58.

तस्य क्षितौ ____________ (प्रलुठ् + शतृ) वह्नि-ज्वालाः समुत्थिताः।

(क) प्रलुठताः

(ख) प्रलुठन्

(ग) प्रलुठत्

(घ) प्रलुठतः।

उत्तराणि:

(घ) प्रलुठतः।

**प्रश्न 59.**

उद्यमस्य ____________ **(महत् + त्व)** सर्वविदितम् एव।

(क) महत्त्वः

(ख) महत्त्वम्

(ग) महत्त्वा

(घ) महत्त्व।

**उत्तराणि:**

(ख) महत्त्वम्

**प्रश्न 60.**

प्रकाशमानः चन्द्रः शोभते।

(क) प्र + काश् + शानच्

(ख) प्रकाश + शानच्

(ग) प्रकाश + मतुप्

(घ) प्रकाश + वतुप।

**उत्तराणि:**

(क) प्र+ काश् + शानच्

**5.** अधोलिखितेषु वाक्येषु 'टाप्' प्रत्ययान्तानि पदानि चित्वा लिखत-

('टाप्' प्रत्यय युक्त शब्दों को चुनकर लिखिए। **Choose and write the 'Taap' suffix.)**

**प्रश्न 1.**

अमृतजला इयं गङ्गा पवित्रा।

(क) अमृतजला

(ख) इयं

(ग) गङ्गा

(घ) पवित्रा।

उत्तराणि:

(घ) पवित्रा।

**प्रश्न 2.**

भक्तैः सदा तु चिरं सेवमाना।

(क) सदा

(ख) भक्तैः

(ग) सेवमाना

(घ) चिरं।

उत्तराणि:

(ग) सेवमाना

**प्रश्न 3.**

कथं नु एतस्याः शोभा विचित्रा।

(क) कथं

(ख) विचित्रा

(ग) शोभा

(घ) एतस्याः

**उत्तराणि:**

(ख) विचित्रा

**प्रश्न 4.**

भागीरथी भवतु मे पूर्णकामा।

(क) मे

(ख) पूर्णकामा

(ग) भवतु

(घ) भागीरथी।

**उत्तराणि:**

(ख) पूर्णकामा

**6. ‘त्व’ – ‘तल्’ – प्रत्ययान्तानि पदानि चित्वा यथोचितं रिक्तस्थानानि पूरयत-**

**(‘त्व’ – ‘तल’ प्रत्ययान्त पद से रिक्त स्थान भरिए। Fill in the blanks with ‘Twa’-‘Tal’ suffixes.)**

**प्रश्न 1.**

विद्यायाः ____________ को न जानाति?

(क) वीरता

(ख) महत्त्वम्

(ग) चञ्चलत्वम्

(घ) मित्रता।

**उत्तराणि:**

(ख) महत्त्वम्

**प्रश्न 2.**

कृष्णसुदाम्नो: ___________ जगति आदर्श स्थापयति।

(क) वीरता?

(ख) पशुत्त्वम्

(ग) मित्रता

(घ) महत्वम्।

उत्तराणि:

(ग) मित्रता

NCERT Class 10 Sanskrit Grammar खण्ड ‘ग’

# Chapterwise NCERT Solutions for Class 10 Sanskrit Grammar :


- Sanskrit Grammar (खण्डः 'क'): अपठित-अवबोधनम्
- Sanskrit Grammar: खण्डः 'ख' (रचनात्मक कार्यम्)-सङ्केताधारितम् औपचारिकम् अनौपचारिक च पत्रम्
- Sanskrit Grammar: खण्डः 'ख' (रचनात्मक कार्यम्)-चित्रवर्णनम् अथवा अनुच्छेदलेखनम्
- Sanskrit Grammar: खण्डः 'ख' (रचनात्मक कार्यम्)-सरलवाक्यानां संस्कृतभाषायाम् अनुवादः
- Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-सन्धिः
  Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-समासाः
- Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-प्रत्ययाः
- Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-वाच्यपरिवर्तनम् (केवलं लट्लकारे)
- Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-समयलेखनम्
- Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-अव्ययाः
- Sanskrit Grammar: खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्)-अशुद्धि-संशोधनम्

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act. The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.